# संस्कृतसाहित्ये कान्तायाः गौरवम् ।

**Lecturer, Ven. Udawela Rewatha thero, Department of Sanskrit, University Of Kelaniya.**

संस्कृतसाहित्ये योषितां स्थानं मतीवधमतमिति बहवश्चिन्तन्ति। किंतु तदनृतम्। वैदिकसंस्कृतौ स्त्रीणामतीवगौरवास्पदमूढवत्यः। ते मनष्यरूपेण चरन्त्यधर्मचारिण्यात्म प्रत्यक्ष राक्षस्यो भवन्तीति कथितं ब्राह्मणैरेव। विप्राः चतुर्वर्णाश्रमधर्मानुकूलेनैव कालं नेतव्यः। प्रागेव ते ब्रह्मचारी नाम्न्याश्रमधर्मे चरन्ति। तस्मिन् समये न केवलमेव चतुर्वेदागमिक सर्वशास्त्राणि पठन्ति। मन्वादिनि धर्मशास्त्राणि चाणक्यादिनि अर्थशास्त्राणि वात्स्यायनादि कामशास्त्राणि च सम्यग् पूरयितव्यानि। तेषु शास्त्रेषु पारप्राप्तमधिगन्तुं प्रभूतकालं नेतव्यं। द्वादशवर्षेभ्यः व्याकरणं श्रूयते।

प्रतिसन्धि संस्कारादष्टवर्षेभ्यः ब्रह्मणस्य उपनयकर्म करणीयमिति मनुस्मृतौ निर्दिश्यते। एवं ब्राह्मणस्य ब्रह्मचारी समयं पञ्चाशत् पञ्चवर्षाणि अतीव दीर्ट्ककालमिति मन्ये। अथ तैः कुटुम्बकरणं आरभ्यते। ततः बहूनि प्रश्नानि प्रभवन्ति। तानि त्यक्तुं तेषां किञ्चित् सामार्थ्ययं नास्ति।

अस्मिन् भुवि भूसुराः भवन्तीति वदन्तः ते विप्राः अयुक्त्या धर्मेण बह्व्याः युवतयः स्वाधिकारे स्थाप्य समग्रकुलपंक्तिषु एकाधिकारं ऊढवन्तः। किंतु गृहधर्मस्य रक्षणं कर्तुं न शक्नुवन्ति स्म। तस्मात् ते स्त्री प्रत्यक्ष राक्षसीति प्रलापं सर्वत्र प्रसारितवन्तः।

तादृशाः विविधाः चिन्ताः पञ्चतन्त्रादिनि उपदेशकाव्येषु शतककाव्येषु च दृश्यन्ते। किंतु महाभारतादि वीरकाव्येषु योषितां तादृशन्याकल्पानि नावर्तन्त। तेषु स्त्री अबला इति न उच्यते। महाभारते शान्तिपर्वे चिरकारी नाम पुत्रस्य वृत्तान्तमत्र एकं निदर्शनं भवति। अपि च अद्य भारतदेशे नास्ति एकमपि गृहं यत्र सावित्र्यै न पूजयति। ते तां देवत्वेन प्रतिगृह्णन्ति। सा भारतीय समाजे - संस्कृतौ अतीवगौरवास्पदं वहति।

पञ्चपाण्डवानां भार्या सा द्रौपदी अपि विदुषिम् इति गण्यते। वेदेषु शतपथादि ब्राह्मणग्रन्थेषु च नारी पुरुषस्य सहयोगिनीरूपेण गृह्यते। स गृहस्वामिनी सहधर्मिणी गृहिणी इत्यादिनि अभिधानैः विशिष्यते। पुत्रवत् तासामपि उपनयनादि संस्कारा अभूवन्। वैदुष्यमासाद्य ताः यज्ञादिकर्माणि विद्याविवादे मन्त्रदर्शनकर्मण्यपि च प्रावर्तन्त। ऋग्वेदे बहव्याः मन्त्रदर्शिकाः ऋषिकाः अपि अभूवन्। काश्चन आजन्म ब्रह्मचर्यव्रतम् अपालयन्। रामायणे कौशल्या तारा च मन्त्रविदौ कथ्यते। एवं संस्कृतसाहित्ये नारीणां स्थानं महत्वपूर्णम् आसीदिति विज्ञायते।